ॐ० ४८१२

नाम- लक्ष्मीनारायण पञ्चाङ्गम्

कर्ता- x

पत्र- ४१ पत्राणिसं. x

विषयः- तन्त्रम्

लक्ष्मीनारायणपंचांगम्
रुद्रयामलस्य देवीरहस्ये

४८१२



ॐनमोभगवतेवासुदेवाय ॐश्रील
क्ष्मीनारायणपञ्चाङ्गं ॐश्रीभैरवः
ॐकैलासोत्तुङ्गशिखरेरत्नराजिविरा
जिते कल्पद्रुमवनाकीर्णेस्वर्णप्राका
रमण्डिते पद्मरागशिलामुक्ताम
णिमाणिक्यमण्डिते वसन्तकुसुमा
मोदगन्धवाहैकवाहिनि नवरत्नशि
लाबन्धपीठस्थपरमेश्वरि देवदेवङ्ग
गङ्गाढ्यंपार्वतीसहितंप्रभुम् हसन्तं
चजपन्तंचध्यायन्तंब्रह्मशाश्वतम् प
न्नगाभरणोपेतंजटामुकुटमण्डितम्
कपालखट्वाङ्गधरंवराभयधरंहरं दे
वदानवयक्षेन्द्रपिशाचोरगसेवितम्

गणगन्धर्वसिद्धैश्च नारदार्चितमव्ययम्
प्रसन्नवदनं देवं देवेश्यात्मामहेश्वरम् प्र
णम्याथ सहसा बद्धाञ्जलिपुटपुरः ३
वाच पार्वती दीना शिवं त्रैलोक्यनायकं
श्रीदेव्युवाच भगवन्देवदेवेश देवासुर
नमस्कृत त्वं शिवः सर्वलोकेशः सत्यस
च्चित्स्वरूपकः अनन्तः परमात्मेति त्रि
जगत्कारणं प्रभुः उत्पत्तिस्थितिकृन्नित्यं
लयकृत्त्वमीश्वरः अनादिनिधनं देव
त्रिगुणात्मापि निर्गुणः किं तस्य स्मरत
त्वं यज्जपस्यघमं ततः तत्वतः श्रोतुमिच्छा
मि त्वत्तो भक्तास्मि किङ्करी श्रीभैरवः
लक्षवारसहस्राणि वारितासि पुनः पुनः

ल: ना:
पं
१

श्रीमहाभागवान्महादेवविष्णुनमोपरिपृच्छामि
भक्त्यानयः श्रमज्ञोदंतवपार्वतितत्त्वतः
एतद्रहस्यंपरमंवक्ष्येगुह्यंहिदिव्यकंसा श्रु
वक्ष्याम्यहमिदंतत्त्वमहत्तत्त्वंमहेश्वरि तव
स्नेहेनवक्ष्यामिनचाख्येयंमहात्मभिः यो
देवदेवोवरदोलक्ष्मीनारायणोविभुः स
र्गस्थितिकरोलोकेप्रलयान्तकरोलयम्
सपवनसमेघानोदेवपद्मगर्भस्तसां दैत्य
किन्नरयक्षेन्द्रमनुजालयपायसां ब्रह्मा
दिकीटपर्यन्तंसमाप्तिनयकारणं श्रुत्य
न्तःसात्विकात्सर्वभूतात्मापरमेश्वरः त
स्यदेवस्यपञ्चाङ्गंपटलंपद्धतिंशिवे क
वचंतत्त्वभूतंचमन्त्रनामसहस्रकम् स्तो

यं जपामि देवेशि स्मरामि सततं सदा प
ठाम्यहर्निशं शान्तः परमानन्दकारणम्
श्रीदेव्युवाच पञ्चाङ्गं देवदेवस्य लक्ष्मी-
नारायणस्य च श्रोतुमिच्छाम्यहं नाथ
वक्तुमर्हसि सांप्रतम् श्रीभैरवः परा-
मार्थदं देवि पञ्चाङ्गं सर्वसिद्धिदम्
वक्ष्यामि परमेशानि लक्ष्मीनारायणस्य
ते तत्वादौ पटले वक्ष्ये मूलविद्यारहस्य-
कम् मन्त्रोद्धारं प्रवक्ष्यामि लक्ष्मीना-
रायणस्य ते तत्वादौ पटले वक्ष्ये मूलविद्या-
रहस्यकम् मन्त्रोद्धारं प्रवक्ष्यामि लक्ष्मी-
नारायणस्य ते अष्टसिद्धिप्रदं सत्यं सा-
धकानां सुदुर्लभम् नां परावदरितं प

ल॰ना॰
पं
३

गलक्ष्मीस्तोत्राभिधं लक्ष्मीनारायणा
येतित्रिषुमन्त्रेमन्त्रस्ततः तस्यविज्ञानेवा
दोषोलक्ष्मीतिर्नविपर्ययः साक्षान्मोक्ष
दोमन्त्रःसर्वार्थफलदायकः वर्णलक्ष
रक्षार्याविनायंनास्तिदेहभाक् श्रीवत्सीभ
वेद्यथादेहेसर्वकर्मस्ववन्नतः पुरश्चरणा
ह्रीनेहिमन्त्रःफलदायकः वदेवण्ये ।
घमन्त्रानेवमृत्यामावेत्वतद्वाद्दे ऊर्ध्वताते
ब्मश्याद्भेपुरश्चरणमाचरेत् वर्णलक्षं
पुरश्चार्यतदर्धंवामन्द्रेष्वपि पञ्चलक्षंवपि
कुर्याज्ञातोन्यूनंनकदाचन शतसंख्यस्तद
स्तेनसाधकस्यकरेणवा मन्त्रःस्वयंचरे
द्वर्कीःपुरश्चर्याविधानतः जपाद्दशांशा

तेद्धोमस्तद्दशांशेन तर्पणम् मार्जनं त
द्दशांशेन तद्दशांशेन भोजनं विनाद ।
शांशाद्धोमेनैन तत्फलमवाप्नुयात् पंच
वक्त्रे ह्रींरीविद्यां लक्ष्मीनारायणस्यादि ज
पेत्तां पञ्चभिःसार्धं उच्चस्थैर्याफलं लभेत्
अथमन्त्रस्य देवेशि संस्कारविधिमाश्रेत
विधिनायेन सयस्तु साधकःसिद्धिभाग्भवे
त् कीलयेद्मन्त्रं देवि ततः संजीवयेत्ततः
विद्यापापहरीं देवि जपेत्सहस्रकवच्छतः ।
सिद्धमन्त्रं जपेद्नित्यं ततः संपुटितं च येत्
एवं योगवरो मन्त्रो योगिनां दुर्लभः कलौ
अथोत्कीलनमाचक्ष्ये मन्त्रस्यास्य महेश्वरि
परांश्रीं ह्रीं शिवे भूलिसानामसकलं पठेत् ।

ल॰ना
पं
४

विद्यान्ते प्रणवो देवि सम्पुटस्थां वयेत्सुधीः म
न्त्रोत्कीलनमेतत्स्यात्सर्वतन्त्रमयं शिवे म
न्त्रसंजीवनं वक्ष्ये शृणु पार्वति सादरं प्रणवि
भूतिमातारं नामान्ते विद्यमीरितं संजीवा
नाख्यो मदितो मन्त्रराजो महेश्वरि शिवेन व
र्णितो विद्ये शिवशापहरो जपेत् वक्ष्यामि
तव भक्त्या देवि गुह्यां सर्वार्थदायिनीं तां वै परा
विदेवेशिवल्लशापं ततः पठेत् मोचयेच्च य
थुक्त्वपलमाद्वयं जपेत् विद्यायं इह लभा
लोके लक्ष्मीनारायणाप्रिया सिद्धेमन्त्रं जपे
न्नीत्वनः संपुटितं चरेत् संपुटस्य मन्त्रे वा
द्ये सर्वागमस्य तु हते विद्यमादौ मन्त्रपश्चा
नामस्थान्ते जपेत्प्रिये संपुटाख्यो मन्त्रदीवि

वर्णितोपि फलाप्तये मन्त्रस्यास्य महादे
वि वर्णितो ऋषिर्ब्रह्मा वाक्सम्भवः त्रिष्टुप्छन्दो मा
याख्याते देवतापि समीरितः लक्ष्मीनारा
यणो देवि बीजं लक्ष्मीरुदाहृता शक्तिः प
रा तथा तारं कीलकं समुदाहृतं भोगा
पवर्गसिद्ध्यर्थं विनियोगः प्रकीर्तितः ध्या
नमस्य प्रवक्ष्यामि लक्ष्मीनारायणस्य ते
येनैव ध्यानमन्त्रेण लक्ष्मीः सन्निधिमीप्स
ति पूर्णेन्दुवदनं पीतवसनं कमलासनं
लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे
तारं माभूतिबीजैः स्वषड्दीर्घान्तैर्महेश्वरि
न्यासं कुर्यात्षडङ्गाभिकारं च आदिपूर्वक
म् मन्त्रोद्धारं प्रवक्ष्यामि सर्वाशासिद्धिदं प

ल॰ना॰
पं
५

5

रम् सर्वसंमोहनं यन्त्रं वाञ्छितैकफलप्र
दम् बिन्दुस्त्रिकोणं वस्वस्रं त्वष्टदलम
ण्डितं षोडशारं त्रिवृत्तं च भूपुरद्वयेनोपशोभ
भितं लक्ष्मीनारायणस्यैतच्छ्रीचक्रं परमार्थ
दम् लयाङ्गं देवि वक्ष्यामि भवमोक्षफल
प्रदं वज्रशक्तिदण्डखड्गपाशाङ्कुशध्वजान्स
नः शूले पद्मचक्रे चैते बाह्यद्वारेषु सर्वदा
इन्द्राग्नियमसोमादावरुणानिलवित्तदाः
सेश्वराः साधकः पूज्या ब्रह्मानन्तादयस्ततः
केशवं माधवं कृष्णं गोविन्दं मधुसूदनं वि
ष्णुं ध्यात्वथं चक्रपाणिं चतुर्भुजम् प
मापथकैभारिं श्रीधरं च जनार्दनम् वैकु
ण्ठं वामनं चैव पूजयेद्गरुडध्वजं षोडशारे

ष्टुदेवेशि वामावर्तेन साधकः नवार्चये
न्मन्त्रादेवि मन्त्री एकचत्वष्टयम् असितांगं
हंसकेतुं वशीपाशिंच पूजयेत् क्रूलत्रये ।
ष्टुदेवेशि साधको मन्त्रवत्सकैः संहारक
कंकचण्डं भूतेशं कालभैरवं कपालभी
षणं चैव वन्याधमश्मानभैरवं पूजयेत्सा
धकः सिद्धै वसुपत्रे महेश्वरि विलुंचवा ।
रवदेवं च देवि दामोदरं तथा नरसिंहं च दे
षिदेवं सङ्कर्षणं तथा त्रिविक्रमं चानिरु
द्धं विष्वक्सेनं च साधकः लक्ष्मीपार्श्वस्थि
तं देवि वसुकोणे तु पूजयेत् मातृकाचयमु
नं चैव यक्षेश्वरस्वतीन्ततः पूजयेद्देव
क्षेशाक्रमयोगेन पार्वति लक्ष्मीनाराय

लं देवं प्रपूजयेद्विन्दुमण्डले महालक्ष्मी
राज्यलक्ष्मीसिद्धलक्ष्मीश्च पूजयेत् शंखच
क्रं गं दं पमं प्रपूजयेद्विन्दुमण्डले गन्धाद्यैः
स्तथा स्नानादि गुरु माल्यविभूषणैः संपूज्य
स्ततश्च मन्त्रस्यैविन्दुभिर्मन्त्रपूजितैः तर्पये
त्साधको देवं मन्त्रैः पंचभिः परम् लयाग
मेतदाख्यातं प्रयोगानथ पार्वति वक्ष्यये
न भवेत्सिद्धिर्मन्त्रस्यास्य विशेषतः स्तम्भ
नं मोहनं चैव मारणाकर्षणोत्तमः वशी
करणं चोच्चाटं शान्तिकं पौष्टिकं तथा प
तेषां साधनं वक्ष्ये प्रयोगानां महेश्वरि येषां
साधनमात्रेण मन्त्रसिद्धिः प्रजायते रवौ
स्नातं महादेवि गत्वा शून्यस्थलेऽलम् ज

पेदष्टुतमीशानिहुनेनत्वदशांशातः स्तुतम
त्सानरपदैवैः श्वेतैरानन्दमिश्रितैः लभ्यते
ज्ञायते सद्योवादिवातार्कपद्मसं चन्द्रेर्थवा
रैवेलायां गत्वा गङ्गातटे केतकीः दिशो बद्धा
सनं सोप्यप्राणायामं विधाय च जपेन्मूलं द
विध्यत्वा हुत्वा देवि दशांशातः स्तुतनागरप
नागकं सन्ते कहमानि च तर्पयित्वा दशांशा
शोनमार्जयित्वा मदेस्तुति तद्वस्त्रनाचये श्रा
लैतिलकं साधकोत्तमः त्रैलोक्यं सदृस्साहः
स्तोमोद्धमेष्वातितत्त्वतः ॥२॥ भौमे गत्वा श्म
शानं च जपेदष्टुतसंख्यया हुनेहृशांशातेदे
वि सर्पिषा वा मधुपायसं दूर्वापात्रे स्वास्वेवं वयस्
स्त्रिया ध्रियतेहत्याताल ॥३॥ बुधे गत्वा टवीहं जपे

ल॰ना॰
पं
७

ज्येचान्तेष्टशिवो अयुतं मूलमन्त्रं जुहुनेत्स
र्पिषा वा कणान् हुत्वा हुतास्सपन्नाद्यपत्राणि
ऊनमानि च रम्भापित्रं तत्सस्य यः प्रादु
र्भविष्यति ४ गुर्वीं गत्वा नदीतीरं जपेन्नद
शांशतः हुनेदाज्येन मधुना वाटीचन्द्रकरी
रकान् तद्भस्मनास्थापितेन त्रैलोक्यं वशमानी
ष्यति ५ शुक्रे शोकं तन्तुं गत्वा जपेदयुतसंख्य
या जुहुनेत्सर्पिना गाग्रडं घालिहूर्णं त्रबाजल
म् तर्पयेदाम्रवाल्येच रसे भक्त्या दशांशतः
घाज्ञोपाम्भसमानस्य भवेद्धाटं नेथकवम् ६
श्मशाने गत्वा नदीतीरं जपेदयुतसंख्यया हो
मेदशांशतः कार्यो ह्रुतपायसजकुंभैः सार
णालैर्जम्बुफलैः शान्तिके जायते क्षणात् ७

शुभ्रेशुभवारेवागत्वेपवनमंडले जपेद
युतमीशानिद्रष्टैदाज्येनपंकजम् सोमले
सकलेसाज्ञेमहाशुष्टिःप्रजायते पतइद
संपरमंतवभक्त्यामयोदितम् लक्ष्मीना
रायणास्येदंसर्वस्वपरमार्थदं अदातव्यम
भक्तेभ्योदुष्टेभ्योवीरवन्दिते महादीना:
पदस्थेभ्योभोगदंमोक्षदंकलौ गोप्यंशु:
द्धितमंतत्वंशुद्धाकुलस्तनमंधिवे अनंदक
रंगोप्यंगोपनीयंस्वयोनिवत् इति:
श्रीदेवीरहस्येरुद्रयामलेतंत्रेलक्ष्मीनारा
यणापटलःसमाप्तः ॥ ॐश्रीभैरवः श्रु
णुदेविवक्ष्येदंगायत्रीकल्पिणीं प
द्धतिंनित्यपूजायालक्ष्मीनारायणस्यते अले

सुहृन्नेर्घायर्नेतलाउम्याय वंडपमासनःस्व
शिरःस्थसहस्राराधोमुखकमलकर्णिका
न्तर्गतंनिजगुरुंसंचिन्तालंकारालंकृतंध्यात्वा।
मानसैरुपचारैरभ्यर्च्य तदग्रेमूलेस्वात्मा
जप्त्वा तज्जपंगुरवेसमर्प्य तदाज्ञामादाय ब
हिरागत्य हूं मलादिसंत्यज्य वगीनंशौच
मादायनद्यादौगत्वा ॐ ह्रीं सर्वजनप्रियाय
यकामदेवायनमः इतिदन्ता धानमुण्डिंकृ
त्वा स्नानंचमूलेनसंप्रोक्ष्यमलापकर्षणस्ना
नंकृत्वा मन्त्रस्नानंचरेत् तत्प्रकारः ॐ गं गंगे
गेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधु
कावेरिजलेस्मिंसंनिधिंकुरु रसकुंभाष्टइयाग्रा
वाह्य ॐ मूलं देवमाभक्तिसलिलमपरिवार ॥:

समल्वित यावत्तान्नर्पयिष्यामि तावद्देवइ
ह्वावह इति आवाहनादिमुद्राः प्रदर्श्य येन
योनिमत्स्यमुद्राः प्रदर्श्य स्वदमङ्कं विलिख्य
जले यन्त्रं विभाव्य ध्यायेन्मूलं विलिख्य तत्रा
मूलस्य स्मरन् त्रिकम्मजेत् ततः सूर्यायार्घ्यं त्रा
यं दद्यात् ॐ ह्रीं हंसः श्रीसूर्याय एषतेऽर्घ्यो
नमः अर्घ्यत्रयं दद्यात् जलादारूढ्यवासं
सिपविधाय देहशुद्धिं विधाय मूलार्घ्यं न्या
सं विधाय मूलं यथाशक्त्या जप्त्वा अवमर्ष
णं कुर्यात् वामहस्ते जलं धृत्वा दक्षहस्तेना
च्छाद्य हं यं रं लं वं इति सप्तधाभिमन्त्र्य उक्त्वा
लितोदकबिन्दुभिर्मूलस्य स्मरन् चतुर्दशधा
ग्निःप्रोक्ष्य अवशिष्टं जलं दक्षहस्ते धृत्वा इ

उत्थानीलाचापायंसन्नाल्य तज्जलकलशंवा
मनाम्ना त्रुटेनवह्निरेचयित्वा वामभागस्थ
शिलायामास्फालयेदित्यघमर्षणम् ततः
पूर्ववन्न्यासंविधायगायत्रींजपेत् ॐह्रींल
क्ष्मीनारायणायविद्महे हौः पद्मलोचनायधीम
हिः ह्रींश्रींतन्नः परमात्माप्रचोदयात् ॥ इ
तियथाशक्त्याजप्त्वा श्रीनाथ्यासंगाया
सवाहनायसपरिच्छदायसांगिकायश्रील
क्ष्मीनारायणाय एषतेअर्घ्योनमः इत्यर्घ्यंत्र
येदत्वा प्राणायामत्रयंचरेत् इतिप्राणाया
मत्रयंविधाय ॐह्रींआत्मतत्त्वंशोधयामि
स्वाहा ॐह्रींविद्यातत्त्वंशोधयामिस्वाहा ॐ
ह्रींशिवतत्त्वंशोधयामिस्वाहा इत्याचम्य

वेवत् स्तूर्योयघ्रश्चोवयेदत्वा देवतायक
वत्रंपठित्वा यथाशक्त्यातर्पणंकुर्यात्
श्रीमूलसश्चार्यश्रीसोमसवाहनसपरि
वारसदेवीकलक्ष्मीनारायणान्तर्पयामि इ
तित्रिस्तनर्पयेमूलविद्यान्तरश्चार्यपदेवे
काञ्जलिनापरिवारान्सन्तर्प्य देवर्षिपि
न्तृसन्तर्प्य पूर्ववस्तूर्योयार्घ्यंदत्वा संहा
रमुद्रयादेवतामात्मनि प्रावाणसंप्रवि
योदितिसन्ध्याविधिः तत्रादौ श्याल्य
गुवनस्युत्स्य देहल्याग्रपवत्यरण्मसरो ले
विलिख्यलक्ष्मीर्ललितायांरे संस्थाप्य स्व
स्त्रायफाशितिमाधारे संस्थाप्य ॐह्रदया
यनमः इतिमन्त्रेणोहर्य ॐलक्ष्मीना

रायणसामान्यार्घायनमः इत्यभ्यर्च्य गंगे
चेति तीर्थमावाह्य धेनुमुद्रां प्रदर्श्य द्वार
मभिषिच्य येदिति सामान्यार्घ्यविधिः पूर्वे गं
गणपतये नमः वं बटुकाय नमः दक्षे क्षं
क्षेत्रपालाय नमः पश्चिमे यां योगिनीभ्यो
नमः उत्तरे गं गंगायै नमः दक्षे यं यमुना
यै नमः वामे सं सरस्वत्यै नमः ऊर्ध्वे श्री
धोदेहल्यामस्त्राय फट् इति द्वारदेवीः सं
पूज्य मण्डले सम्पूजितं कृत्वा विघ्नसृष्टिं
अर्चयेत् ॐ ह्रीं आसनमंत्रस्य मेरुपृष्ठ ऋ
षिः सुतलं छन्दः कूर्मो देवता आसनशो
धने विनियोगः ह्रीं पृथिव्यै नमः ॐ पृथ्वि
त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं

व धारय मां देवि पवित्रं कुरु चासनम् ॐ
ह्रां आधारशक्तिकमलासनाय नमः अ
नन्ताय नमः पद्माय नमः पद्मनालाय
नमः तत्रोपविश्य ता[ला]त्रयं दत्वा ॐ
अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञ
या। इति वामपार्ष्णिघातत्रयेण विघ्नानु
त्सार्य नाराचमुद्रां प्रदर्शयेदित्यासनं
संशोध्य गुरुं प्रणमयेत् अखंडमण्डला
कारं व्याप्तं येन चराचरम् तत्पदं दर्शितं ये
न तस्मै श्रीगुरवे नमः ॐ गुरुभ्यो नमः प
रमगुरुभ्यो नमः ॐ परापरगुरुभ्यो नमः
ॐ परमेष्ठिगुरुभ्यो नमः इति शिरसि मं

ल: ना: पं ११

मूलं देवं प्रणम्य ॐ ह्रीं मित्याक्षरेण सुषु
म्णावर्त्मना प्रदीपकलिकाकारं ब्रह्मबिलप
र्यन्तं नीत्वा ततः शिवे संयोज्य तयोरै
क्यं विभाव्य तदुद्भूतामृतधारयाकुलप
हृत्कमलत्रयं पुनस्तेनैव मार्गेण तानानीय
द्विधाराभिः शुभ्रयन्त्रीकृतलिनीलं पदंश्या
पयित्वा वामकुक्षौ पापपुरुषं शुष्कश्म
श्रुकारं धूम्रवर्णं ध्यात्वा यं रं लं वं इति शो
षणदाहनाप्लावनोत्पादनादि कुर्यात्
यं वायुबीजेन षोडशधा जपेन शोषयेत् ।
रं वह्निबीजेन चतुःषष्टिधा जपेन शोषयेत्
वं वरुणबीजेन द्वात्रिंशद्धा जपेन प्लाव
येत् लं क्षितिबीजेन दशधा जपेन धारी

यं विल्लीभूतं विधाय प्राणप्रतिष्ठां कुर्यात्
इति भूतशुद्धिः ॐ ह्रीं क्रौं यं रं लं वं शं षं सं हं
सोऽहं सः हंसः मम प्राणा इह प्राणाः ४ म
म जीव इह स्थितः ४ मम सर्वेन्द्रियाणि १४
मम वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा
इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति ।
प्राणप्रतिष्ठामन्त्रः प्राणान्समर्प्य प्राणा
यामत्रयं विधाय पूर्ववदाचम्य संकल्प पू
र्वं न्यासं कुर्यात् अस्य श्रीलक्ष्मीनाराय
णमूलमन्त्रस्य शिव ऋषिः त्रिष्टुप्छन्दः ।
श्रीलक्ष्मीनारायणो देवता श्रीं बीजं ह्रीं शक्ति
ॐ कीलकं श्रीभोगापवर्गसिद्ध्यर्थे लक्ष्मीना
रायणपूजायां विनियोगः ॐ शिवऋषये न

मः शिरसि त्रिष्टुप्छन्दसे नमः मुखे लक्ष्मीना
रायणो देवतायै नमः हृदि श्रीं बीजाय नमः
गुह्ये ह्रीं शक्तये नमः पादयोः ॐ कीलकाय
नमः सर्वाङ्गेषु इतिविन्यस्यषडंगमादिजयी
नु ॐ ह्रां श्रां श्रं अंगुष्ठाभ्यां नमः ह्रीं श्रीं तर्जनीभ्यां
नमः ह्रूं श्रूं मध्यमाभ्यां वषट् ह्रैं श्रैं अना॰
मिकाभ्यां हुम् ह्रौं श्रौं कनिष्ठिकाभ्यां वौषट्
ह्रः श्रः करतलकरपृष्ठाभ्यां फट् इति करन्या
सः एवं षडंगन्यासः अथ करशुद्धिः ॐ काम
रूपपीठाय नमः हृदयोः ह्रीं जालन्धरपीठाय
नमः तर्जनीशिखयोः ह्स्रौः पूर्णगिरिपीठाय
नमः मध्यमाशिखयोः श्रीं वाराणसीपीठा
य नमः अस्त्राय फट् करतलपृष्ठयोः ह्रीं मन्त्र

त्रीपीठाय नमः नेत्रेभ्यो वौषट् कनिष्ठ
ह्रौं ह्लौः श्रवलीपीठाय नमः कवचाय हुं अ
नामिकयोः इति करशुद्धिः अं आं इं ईं उं ऊं
ऋं ॠं वामपादाग्रगुल्फान्ते लृं लॄं एं ऐं ओं
औं अं अः दक्षपादाग्रगुल्फान्ते कं खं गं घं
ङं गुल्फादिवामपादमूलान्ते चं छं जं झं ञं
गुल्फादिवामपादमूलान्ते टं ठं डं ढं णं ना
भ्यादिवाहु[illegible]मूलान्ते तं थं दं धं नं नाभ्या
दिदक्षबाहुमूलान्ते पं फं बं भं मं कक्षादि
कक्षादन्ते यं रं लं वं स्कन्धादिवामकर्णान्ते
शं षं सं हं दक्षस्कन्धादिदक्षकर्णान्ते लं क्षं :
शिरसः पादपर्यन्तमिति त्रिर्व्यापयेत् अं
कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः इं चं छं जं

ञं ईं तर्जनीभ्यां [illegible] स्वाहा उं टं ठं डं ढं
णं ऊं मध्यमाभ्यां वषट् एं तं थं दं धं नं ऐं अ
नामिकाभ्यां हुं ओं पं फं बं भं मं औं कनिष्ठि
काभ्यां वौषट् अं यं रं लं वं शं षं सं हं ळं क्षं
अः करतलकरपृष्ठाभ्यां फट् इति करन्या
सः अथ मातृकान्यासः अं नमः शिरसि
आं नमः मुखवृत्ते इं नमः दक्षनेत्रे ईं नमः
वामे उं नमः दक्षकर्णे ऊं नमः वामे ऋं ना
मः दक्षनासाग्रे ॠं नमः वामनासाग्रे लृं नमः
दक्षगण्डे लॄं नमः वामे एं नमः ऊर्ध्वोष्ठे ऐं न
मः वामे ओं नमः ऊर्ध्वदन्तपंक्तौ औं नमः अ
धोदन्तपंक्तौ अं नमः शिरसि अः नमः मु
खे कं खं गं घं ङं नमः इति दक्षबाहुसन्धिषु

चं छं जं झं ञं नमः इति वामबाहुसन्धिषु
टं ठं डं ढं णं नमः इति दक्षबाहुसन्धिषु तं
थं दं धं नं इति वामपादसन्धिषु पं नमः द
क्षपार्श्वे फं नमः वामे बं नमः पृष्ठे भं नमः
नाभौ मं नमः जठरे यं नमः हृदि रं नमः
दक्षांसे लं नमः ककुदि वं नमः वामांसे
शं नमः हृदादिदक्षहस्ताग्रान्ते षं नमः हृ
दादिवामहस्ताग्रान्ते हं नमः हृदादिवाम
पादाग्रान्ते ळं नमः पादादिशिरःपर्यन्ते ।
क्षं नमः शिरसः पादपर्यन्ते इति त्रिर्व्यापा
येत् ततः ऐं वं ऐं इति तालं न्यसेत् ऐं ह्रीं ऐं
इति तालं मातृकास्थानेषु न्यसेत् ऐं सौः
ऐं क्लीं न्यसेत् ऐं ह्रीं ऐं तालं न्यसेत् ऐं श्री

थं इति तालेन ग्रसेत् केवलं मातृकास्थाने
ष मूलेन ग्रसेदिति षोढान्यासं विधाय स्था
लस्थं चरन् देहशुद्धिं कृत्वा घटपूजां कुर्यात्
तत्र सामान्यार्घं पूर्वमेव विन्दुषट्कोणाष्टदलं च
तुरस्रं विलिख्य ततः ॐ पीठेभ्यो नमः इत्यभ्य
र्च्य तत्र तालिनाधारं संस्थाप्य रं वह्निमण्ड
लाय दशकलात्मने नमः इत्यक्षतैः संपूज्य
तत्र श्रीघटं संस्थाप्य ॐ ब्रह्मनाय च यथा देवि वि
ष्णुना च यथा रुद्र ब्रह्मणा च यथा पूर्वं तथा
त्वां स्थापयाम्यहं इति संस्थाप्य ॐ अर्कमण्ड
लाय द्वादशकलात्मने इति गन्धपुष्पैरभ्यर्च्य
मूलं विलोममातृकया परमामृतेन पूर्ये सौः
सोममण्डलाय षोडशकलात्मने नमः इति

सम्मृज्य अस्त्रायफडितितुलेइऽंभसंन्ता
ज्य मूलेसन्तुप्तवोत् नाम्नायाधिर्गंयंगत्न्ना
यात् तत्रत्रिकोणाविलिख्य मूलेविन्यसेत् १
मूलेनप्रमृज्य ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वपेश्चक
णापंश्योचय २ अस्टतेश्रावय २ स्वाहा इति
इश्योपरिदत्वा धासंजप्य सूर्यमंडलसंभू
तेवरुणालयसंभवे अमावीजमयदेवि
श्रक्षयायाहि शुच्यते वेदानांयणवीवीजेब्र
ह्मानंदमयीयदि तेनसत्येनतेदेविब्रह्मह
त्याविमोचन पावमानःपरानेदःपावमाना
परोरसः पावमानेपरंत्नाांतेनत्वांपावया
मह इत्यत्रिकोणाविलिख्य मूलेविन्यसेत् मू
लेनप्रमृज्य ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः सर्वपेश्चक्षणा

लक्ष्मी
पं
१५

15

पं मोचय २ अमृते स्रावय २ स्वाहा इति इ
ष्टोपरि दद्यात्। संजप्य सूर्यमण्डलसंभूते
वरुणालय इति जित्वा ॐ हं क्षां ईं अमृते अ
मृते इत्याद्येव अमृतवर्षिणि अमृते स्रावय ॐ
ह्रीं अमृते सूर्यै नमः इति इष्टोपरि दद्यात्। जप्
त्वा आनंदभैरवभैरवी ध्यात्वा ॐ हस क्ष
मलवयं आनंदभैरवाय वौषट् दद्यात्। ज
पेत् ॐ सहक्ष मलवरयं सुधादेव्यै वौषट्
इति इष्टोपरि दद्यात्। जप्त्वा नतिं विकाणां वि
लिख्य ॐ गंगे च यमुने चैव गोदावरि सरस्व
ति नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु
इति तीर्थमावाह्य आकारादि षोडशाक्षक
रादि षोडशं ज्ञानं च हेले त्रैविलिख्य मूलं दद्यात्।

जप्त्वा गंधपुष्पैः दूर्वक्षतैः संपूज्य मीनमुद्रा
दीन् शोधयेदिति द्रव्यशुद्धिः मीनोपरिथी
मयोनिमत्स्यमुद्राः प्रदर्श्य त्र्यम्बकंयजाम
हे इति मूलं त्रिर्जप्त्वा मांसं शोधयेदिति मीन
शुद्धिः मांसोपरि मुद्राद्वयं प्रदर्श्य प्रतद्वि
स्तव॰ मूलं त्रिर्जप्त्वा मुद्राः शोधयेदिति मांस
शुद्धिः मुद्रोपरि मुद्राद्वयं प्रदर्श्य ओं तद्विष्णो
परमं इति मूलं त्रिर्जप्त्वा मुद्राखंडमांसखंड
मीनखंडादीन् घटे निक्षिप्य चलत्संगविलि
ख्य स्ववामे साधारं पात्रं गुरोः संस्थाप्य कला
शस्तेन तं पूर्य मूलेन पूजयेत् ततः स्वभोगपा
त्रं शक्तिपात्रं योगिनीपात्रं मधुपर्कपात्राणि
संस्थाप्य कलशामृतेन पूर्य घृतमधुशर्क

ल:ना
पं
१६

16

गलिमधुपर्कपाद्यंश्रम्रूर्ध्वं योगपीठश्रुतांकयो
त् ॐ बिन्दुविभूषणात्रिकोणाविराजमानवसु
कोणमणिपंक्तिस्फुरन्तांवितवसुदलविराजितषो
डशदलखचितस्फुरत्त्रयमेखलाभूषितचतुरस्रश्री
यन्त्रराजे विलिख्य वा यथालभ्य श्रीवर्णादि पा
त्रे निवेश्य ह्रादिसदेवीकेदेवमानसैरुपचारै
रभ्यर्च्य बाह्यपूजांकुर्यात् ॐ तं ह्रीं मण्डूका
यनमः २ कालाग्निरुद्रायनमः २ मूलप्रकृ
त्यैनमः २ आधारशक्त्यैनमः २ कूर्मायनमः
अनन्तायनमः २ वराहायनमः २ पृथिव्यैनमः
सुधार्णवायनमः २ मणिद्वीपायनमः अष्ट
दिक्तनवरत्नांकितेभ्योनमः २ सुवर्णपर्वताय
नमः २ नन्दनोद्यानायनमः २ कल्पवनायन

मः २ पद्मवनायनमः २ विविचरत्नदवि
तभूमिकायैनमः २ चिन्तामणिमंडपाय
नमः २ नवरत्नमयवेदिकायैनमः २ रत्न
सिंहासनायनमः २ ॐ ह्रीं श्रीं श्वेतच्छत्रायनमः २
स्थीदिदित्त्वधर्मज्ञानवैराग्यैश्वर्येभ्योनमः २
विदित्त्वधर्मज्ञानावैराग्यानैश्वर्येभ्योन
मः २ सत्त्वायनमः २ रजसेनमः २ तमसे
नमः २ तत्वेभ्योनमः २ ॐ ह्रीं श्रीं मंत्रव
र्णभूषितकर्णिकायैनमः प्रकृतिमय
पत्रेभ्योनमः विकृतमयकेसरेभ्योनमः
ॐ ह्रीं श्रीं आनंदकन्दासनायनमः २ ॐ पंचाश
द्वर्णभूषितपद्मासनायनमः मूलेसर्वत
त्वात्मकायश्रीयोगपीठायनमः इतिसं

मूलं देवं ध्यात्वा त्रिखंडां मुद्रां याम्भिनां निव
द्य देवं प्राप्तमकलभपरिवारसमन्वित
यावत्वां पूजयिष्यामि तावद्देव इहावह ॥ इ
ति पुष्पांजलिं क्षिप्त्वा आवाहनादि मुद्राः प्रद
र्श्य मूलेसंपाद्य देवीकां श्रीलक्ष्मीनारायणदे
व इहागच्छ २ इह सन्निधेहि इह सन्निधत्स्व मूले
ॐ ह्रीं ह्रौं श्रीं ह्रीं क्लीं ह्सः लक्ष्मीनारायण
प्राणा इह प्राणाः ८ लक्ष्मीनारायणस्य सर्वे
न्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राण
प्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा
इति लेलिहानमुद्रया प्राणान्दत्वा मूलेन।
श्रीदेवीकलक्ष्मीनारायणाइदमासनम्।
स्वाहा मूलविद्यांते पाद्याचमनीयमर्घ्य।

कोर्ण्गान्यत्रणात्तत्तभूपदीपनैवेयत्ता

मूलल्लचचामसतात्रिकादीनिवेयप्रता

मः मूलेनकानधामन्तेनतत्वष्रुइयासो

गेस्सवाहनेसात्रुधेसपरिच्छदंसदेवीके

लक्ष्मीनारायणोपूजयामिनमः तर्पया

मिनमः इतित्रिःसन्तर्प्य देवात्तामादाय

परिवारदेवताःपूजयेत् इतिपुष्पांजलिं

दत्वा मूले महालक्ष्मीश्रीपादुकांपूजया

मिनमः तर्पयामिनमः मू: राज्यलक्ष्मी

श्रीपादुकांपूजयामिनमः तर्पयामिना

मः मूलं १ सिद्धलक्ष्मीश्रीपादुकांपूजया

मिनमः तर्पयामिनमः इतिविन्दोश्चथा

मावरणाम ॐ ह्रीं श्रीं सौः गंगंगांश्रीपादुकां

ल॰ना॰
पं
२८

पूजयामि नमः तर्पयामि नमः ३ वामनाश्री
पादुकां पूजयामि नमः तर्पयामि नमः ३ स
रस्वतीश्री पादुकां पूजयामि नमः तर्पयामि
नमः ३ तिश्रश्रेङ्क्ष्लीयावरणं ॐ ह्रीं श्लीः श्री
पादुकां पूज यामि नमः तर्प॰ ३ चक्रश्री पादु
कां पूजयामि नमः तर्पयामि नमः ३ गदा॰
श्री पादुकां पूजयामि नमः तर्पयामि नमः
पद्मश्री पादुकां पूजयामि नमः तर्पयामि
नमः ३ तिविन्दोस्तृतीयावरणम् मूलम
लक्ष्मीश्री पादुकां पूजयामि नमः त
र्पयामि नमः मूल ३ लक्ष्मीवासुदेवश्री॰
मूले लक्ष्मीदामोदरश्री पादुकां॰ न॰ मूले॰
लक्ष्मीनरसिंहश्री पादुकां पूजयामि नमः

18

मूलं लक्ष्मीवासुदेवश्री पा पू नं मूलं लक्ष्मीदामोदर श्रीपापूनं

तर्पयामिनमः मूलं २ लक्ष्मीसंकर्षणा श्रीपादुकेंपूजयामिनमः तर्पयामिनमः लक्ष्मीवासुदेवश्रीपादुकेपूजयामिनमः तर्पयामिनमः २ मूलं लक्ष्मीदामोदर श्रीपादुकेपूजयामिनमः तर्पयामिनमः २ मूलं लक्ष्मीत्रिविक्रमश्रीपादुकेपूजयामिनमः तर्पयामिनमः २ मूलं लक्ष्मीविष्वक्सेनश्रीपादुकेंपूजयामिनमः तर्पयायामिनमः मूलं २ लक्ष्मीवाह्नप्रथमोग्नार्ध्वं वक्कोणोच्चतर्थ्यवरणाम् ॐह्रींह्सौः महाभैरवश्रीपादुकेंपूजयामिनमः तर्पयामिनमः २ मूलं महाभैरवश्रीपादुकेंपूजयामिनमःतर्पयामिनमः २ चण्डभै

२

रवश्रीपादुकांपूजयामिनमः तर्पयामिन
मः ३ भूतेशभैरवश्रीपादुकांपूजयामिन
मः तर्पयामिनमः ३ कालभैरवश्रीपादु
कांपूजयामिनमः तर्पयामिनमः ३ कपा
लभैरवश्रीपादुकांपूजयामिनमः तर्पया
मिनमः ३ भीषणभैरवश्रीपादुकांपूजया
मिनमः तर्पयामिनमः ३ श्मशानभैरव
श्रीपादुकांपूजयामिनमः तर्पयामिनमः ३
इत्यष्टदलेषुपंचमावरणम् ऐं असितांगश्री
पादुकांपूजयामिनमः तर्पयामिनमः ऐं
हेमकेतुश्रीपादुकांपूजयामिनमः तर्पया
मिनमः ऐं वंशीपालिश्रीपादुकांपूजया
मिनमः तर्पयामिनमः ऐं स्वग्रसश्रीपादुकां

पूजयामिनमः तर्पयामिनमः ऐं परम
गुरुश्रीपादुकांपूजयामिनमः तर्पया
मिनमः ऐं परापरगुरुश्रीपादुकांपूज
यामिनमः तर्पयामिनमः ऐं परमेष्ठि
गुरुश्रीपादुकांपूजयामिनमः तर्पयामि
नमः ऐं इतिवायव्यादीपूर्णान्तंपूजनंअथ
षष्ठावरणम् ॐ ह्रीं ह्सौः केशवश्रीपादु
कांपूजयामिनमः तर्पयामिनमः ऐं मा
धवश्रीपादुकांपूजयामिनमः तर्पयामि
नमः ऐं कमलश्रीपादुकांपूजयामिनमः
तर्पयामिनमः ऐं मधुसूदनश्रीपादुकां
पूजयामिनमः तर्पयामिनमः ऐं गदा
धरश्रीपादुकांपूजयामिनमः तर्पयामि

नमः ॐ [illegible] श्रीपादुकां पूजयामि
नमः तर्पयामि नमः ॐ चक्रपाणि श्री
पादुकां पूजयामि नमः तर्पयामि नमः
ॐ चतुर्भुज श्रीपादुकां पूजयामि नमः त
र्पयामि नमः ॐ पद्माय श्रीपादुकां पूज
यामि नमः तर्पयामि नमः ॐ कैटभारि
श्रीपादुकां पूजयामि नमः तर्पयामि न
मः ॐ [illegible] श्रीपादुकां पूजयामि न
मः तर्पयामि नमः ॐ जनार्दन [illegible] श्रीपा
दुकां पूजयामि नमः तर्पयामि नमः ॐ वै
कुण्ठ श्रीपादुकां पूजयामि नमः तर्पया
मि नमः ॐ वामन श्रीपादुकां पूजयामि
नमः तर्पयामि नमः ॐ गरुडध्वज श्रीपादु

कें पूजयामि नमः तर्पयामि नमः ई ग
ह्रंयन्त्रश्रीपादुकां पूजयामि नमः त
र्पयामि नमः ई इति षोडशदलेषु सम
मावरणम् ई लें इन्द्रश्रीपादुकां पूजयामि
नमः तर्पयामि नमः ई रं वह्निश्रीपादुकां
पूजयामि नमः तर्पयामि नमः ई यं यम
श्रीपादुकां पूजयामि नमः तर्पयामि नमः
ई क्षं निरृतिश्रीपादुकां पूजयामि नमः त
र्पयामि नमः ई वं वरुणश्रीपादुकां पूजा
यामि नमः तर्पयामि नमः ई यं वायुश्रीपा
दुकां पूजयामि नमः तर्पयामि नमः ई सं सो
मश्रीपादुकां पूजयामि नमः तर्पयामि नम
ई हं ईशानश्रीपादुकां पूजयामि नमः तर्प

यामि नमः ह्रीं अनन्त श्रीपादुकां पूजयामि
नमः तर्पयामि नमः ऐं ह्रीं ब्रह्म श्रीपादुकां
पूजयामि नमः तर्पयामि नमः इत्यध्यक्षौ
ववेश्रेष्ठमावरणम् ऐं वज्र श्रीपादुकां पूजया
मि नमः तर्पयामि नमः ऐं शक्ति श्रीपादुकां
पूजयामि नमः तर्पयामि नमः ऐं वज्र श्रीपा
दुकां पूजयामि नमः तर्पयामि नमः ऐं शक्ति
श्रीपादुकां पूजयामि नमः तर्पयामि नमः ऐं
दंड श्रीपादुकां पूजयामि नमः तर्पयामि नमः
ऐं खड्ग श्रीपादुकां पूजयामि नमः तर्पयामिन
मः ऐं पाश श्रीपादुकां पूजयामि नमः तर्प
यामि नमः ऐं पाश श्रीपादुकां पूजयामि नमः
तर्पयामि नमः ऐं यक्ष श्रीपादुकां पूजयामि

नमः तर्पयामि नमः ॐ धनश्रीपादुकां पूज
यामि नमः तर्पयामि नमः ॐ मूलश्रीपादु
कां पूजयामि नमः तर्पयामि नमः इति बा
ह्यद्वारेचक्रेष्वनवमावरणं मूलंपिंडस्थाय
सांगं सवाहनं सायुधं सपरिच्छदं सलक्ष्मी
कं लक्ष्मीनारायणं देवं पूजयामि नमः तर्प
यामि नमः इति संपूज्य योनिमुद्रया प्रणम्यो
त् इति दशमावरणं धूपनैवेद्याचमनीयतां
बूलच्छत्रादीनि निवेद्य देवाग्रे मला मूलेन सं
पूज्य यथाशक्त्या मूलं जप्त्वा गुह्यातिगुह्यगो
प्तात्वमित्यादि देवाय जपं समर्प्य तदग्रे कव
चसहस्रनामस्तवपाठं कृत्वा तदपि देवदे
वैः समर्प्य साधकैः सह साधकः सहपात्र

वन्देकैर्योगीन् यावन्नचलते दृष्टिर्यावन्न
चलते मनः तावन्मात्रं प्रकर्तव्यं पञ्चमा
नमन्तःपरे इति मुद्रापात्रं त्वा शान्तिस्तो
त्रं पठित्वा पुष्पाञ्जलिं दत्वा नमस्यात्पुष्पमा
त्राष्टकं श्रीसदेवीकं देवं प्रापयित्वा पुनर्हृ
त्कमलमानीय स्वयमपि लक्ष्मीनारायणो
विदितनियदेहो भूत्वा वा हतेति वैस्वाचारपरे
स्वतंत्रविरहितेदिति संहारमुद्राप्रताम्य इति
श्रीदेवदेवस्य लक्ष्मीनारायणस्याने पइतिनि
त्यपूजायां वर्णितं गोपितं च क्रमगुह्यं गोप्य
मिदं तत्त्वं पूजासारं महेश्वरि गोपयेद्भैरवः स
र्वमित्युक्ता परमेश्वरी इति श्रीदेवीरहस्ये तन्त्रे
लक्ष्मीनारायणपूजापटलं समाप्तमथ वर्मय
नच्यते

श्रीभैरवः ॥ श्रृणु नाकथयिष्यामि लक्ष्मीना
राधराणास्याते कवचं मंत्रगर्भं वज्रपंजरा
ख्यया ॥ श्रीवज्रपंजरं नाम कवचं परमा
द्भुतं ॥ रहस्यं सर्वदेवानां साधकानां विशेष
तः ॥ यं धृत्वा भगवान्देवः प्रसीदति पुरान्त
मान् ॥ यस्य धारणमात्रेण ब्रह्मलोकपिता
महः ॥ ईश्वरो देवि भीमो वा सर्वोपि दिव
स्पतिः ॥ सूर्यस्तेजोनिधिर्देवि चंद्रमास्तावके
श्वरः ॥ वायुश्च बलवांल्लोके वरुणो यादसांप
तिः ॥ कुबेरोपि धनाध्यक्षो धर्मराजो यमः स्मृ
तः ॥ यं धृत्वा सहसा विष्णुः संहरिष्यति दानवा
न् ॥ जघानामारायणादींश्च किं वदस्येदमतः परं
कवचस्यास्य ब्रह्मभगो ऋषिर्नायं स्तुतिः शिवः

त्रिष्टुप्छंदोदेवताचलक्ष्मीनारायणोमतः २
माबीजंपराशक्तिःक्लींकीलकमीरितं भो
गापवर्गसिद्ध्यर्थेविनियोगाइतिस्मृतः ह्लौं
तुवदनेपीतवसनेकमलासने लक्ष्याश्रि
तंचतुर्बाहुंलक्ष्मीनारायणंभजे इतिध्याना
म् ॐवासुदेवोवतुमेमस्तकंसशिरोरुहम्
ह्रींललाटंसदापातुलक्ष्मीविष्णुःसमन्ततः
ह्सौःनेत्रवमाल्लक्ष्मीगोविन्दोजगतांपतिः
ह्रींनासांसर्वदापातुलक्ष्मीदामोदरःप्रभुः श्रीं
मुखंसततंपातुदेवोलक्ष्मीत्रिविक्रमः लक्ष्मीं
कंठंसदापातुस्कंदौनारायणोवतु ऐंह्स्लौ
सर्वदापातुदेवोलक्ष्मीजनार्दनः नमःपार्श्वौ
सदापातुलक्ष्मीनन्दैकनन्दकः श्रंश्रींईं ३

पातु वक्त्रं ॐ लक्ष्मीत्रिपुरेश्वरः ॐ ॐ कं खं
पातु कर्णौ ह्रीं लक्ष्मीर्गरुडध्वजः ह्रें ह्रूं पें फें
पातु हस्तौ ख्लौंः लक्ष्मीनृसिंहकः ॐ ॐ ग्रं ग्रः
पातु नाभिं ह्रीं लक्ष्मीर्विश्वरूपवान् कें खें गें घें
गुह्यं पातु श्रीं लक्ष्मीः कैटभान्तकः चें छें जें झें
पातु शिश्नं लक्ष्मी लक्ष्मीश्वरः प्रभुः टें ठें डें ढें
कटिं पातु नारायणो नायकः तें थें दें धें न
नु चोरुयुग्मं ॐ लक्ष्मीजगत्साक्षी पें फें बें भें पा
तु जानुनी ग्लौं ह्रीं लक्ष्मीश्चतुर्भुजः यें रें लें वें पातु
जंघे क्लौंः लक्ष्मीर्गदाधरः शें षें सें हें पातु प
दौ ऐं ह्रीं श्रीं लक्ष्मीरण्यागम्दन् लं क्षः पादौ स
दा पातु मूलं लक्ष्मीसहस्रपात् अं आं इं ईं
उं ऊं पातु लक्ष्मीशः सकलेवरः ऋं ॠं लृं

ल॰ ना
प॰
२५

24

वंतः पातु वह्निं वैकुंठो मदा नमस्या दिमामोदा
हिलो पातु नैरृत्यां निरृतिस्मरम् वरुणः प
श्चिमे यान्मां वायव्ये वनमालभृत् उत्तरे धन
दः पायादैशान्यामीश्वरोवतु वज्रपाणिरा
दाविन्द्रः पाताया शिधंजांकितः सत्पलाः सर्व
दा पातु दिशीशाः परमार्थदाः अनंतः पातु पा
तित्यमूर्ध्वं ब्रह्मभावनात्मसौ दक्षादित्व सदा
पातु लक्ष्मीनारायणोप्यधः प्रभाते पातु मां
विष्णुर्मध्याह्ने वासुदेवकः दामोदरोवता॰
ह्णायं निशादौ नरसिंहकः संकर्षणोर्धरात्रे
वाद्यभाते व्यात्रिविक्रमः अनिरुद्धः सर्वका
ले विश्वक्सेनश्च सर्वतः रणे राजकुले द्यूते वि
वादे प्राणसंकटे ॐ ह्रीं ह्लीं क्लीं श्रीं मूललक्ष्मी

नारायणोवतु ॐॐॐ राजद्वारेशिवतः
पायात्समांकेशवः ह्रींह्रींह्रीं दददहालौ
र्हसदसौवक्रेवैनेमोधवः ह्रींह्रींह्रीं जल
पर्वताग्रमयतः पायादनन्तोविभुः श्रीं
श्रींश्रीं शाशाशा ललेप्रतिदिने लक्ष्मीप-
वःपातुमाम् इतीदं कवचं दिव्यं वज्रपंज
रकाभिधम् सर्वसौभाग्यनिलयं सर्वो-
मारक्षणप्रदम् लक्ष्मीसंवर्धनं तत्वं परमा
र्थरसायनम् मंत्रगर्भं जगत्सारं रहस्यं त्रि
दिवौकसां दशवारं पठेद्रात्रौ रोगानैवभव
धोन्नमः स्वभवद्यदेपथ्येपल्लक्ष्मीनाराया-
णोस्मृधीः त्रिसंध्यं यःपठेन्नित्यं कवचं मन्म
थोहितं सयातिपरमंधाम सर्वसाधकोविसा।

ल॰ना॰
पं
२५

वीश्वरः सुप्रवीनपदस्थायिनः पदेदात्म
विमकः श्रानन्दचूर्णीनसत्पूर्णंलभेत्सोत्र
सस्माधकः गंधाष्टकेन विलिख्येद्वीभूर्जे
जपन्सत्तम् पीतसूत्रेणसंवेष्ट्यैवर्णना
थवेष्टयेत् धारयेत्कटिकंठमूर्ध्नि लक्ष्मीनारा
यणांस्मरन् रणेविघ्ने विजित्यासुकरप्राली
गृह्ण्माविधेत् वंध्यावाकाकवन्ध्यावमृत
वत्सांचयानारी साधवीयमंत्रदेवीलभे
त्सुतांचिरंसुषः सुरूपंदर्शनीयश्चायुष्मंच्या
त्वामञ्चजपन् वर्णलक्षंत्र संख्यायीफलमा
प्नोतिसाधकः वहुनोक्तेनकिंदेविकवचा
स्यास्यपावैति विज्ञानानेनसिद्धिःस्यान्मंत्र
स्यास्यमहेश्वरि सर्वागमरहस्याढ्यंतत्वात

स्वेवान्तरम् श्रीमन्नारायणदातृकैवला
यद्रूपात्मने दीप्तिनायकलीनायस्वशि
खायमहात्मने महाचीनपदस्थायदात
ऽकवचोनमं गतंभोग्यंमहादेविलक्ष्मी
नारायणाश्रियं वज्रपंजरकंवर्मगोपनीयंस्व
योनिवत् इति श्रीरुद्रयामले तंत्रे देवीर
हस्ये लक्ष्मीनारायणकवचं संपूर्णम
रैं गुह्यसहस्रनामः ॥ श्रीभैरवः अथ
नाकप्रवक्ष्यामि विद्यां सहस्रनामकं +
भोगदं मोक्षदं लोके लक्ष्मीनारायणस्य
नेः+ सर्वमंत्रमयं तत्त्वं सर्वपूजाफलप्रदा
म्+ सर्वागमरहस्याढ्यं सर्वदेवैकपूजितं
श्रीभैरवः एतद्रहस्यं परमं मन्त्रनामस्म।

+ श्रीदेव्युवाच
भगवन्करुणां
भोपे लक्ष्मीना
रायणस्तव

ल॰ना
पं
२९

26

स्त्रकम् लक्ष्मीनारायणस्येष्टं सर्वस्वं
तत्वतो मम गुह्यं गोप्यतमं देवि सर्वस्वं दे
धर्मवर्धनम् लक्ष्मीसंवर्धनं लोके पवित्र
परमार्थदम् महादीनपदं ख्यातं कौलि
कीनामपीष्टदं अघपातकपापानां शमनं
दमनाशकम् सर्वतीर्थफलोद्भूतं सर्वदे
ज्ञफलप्रदं अवाच्यं मार्गहीनानां मना
च्छेदहृष्टचेतसां वैष्णवः कौलिकश्रेष्ठः पठे
न्नामसहस्रकं गुरूपदेशतो देवि सर्वसिद्धि
मवाप्नुयात् ॥ अस्य श्रीलक्ष्मीनारायणस
नाम
हस्रस्य श्रीशिवऋषिः त्रिष्टुप्छन्दः श्रील
क्ष्मीनारायणो देवता श्रीं बीजं ह्रीं शक्तिः ऐं
कीलकं धर्मार्थकाममोक्षार्थे पाठे विनि

योगाः श्रीलक्ष्मीविलासीशानो लक्ष्मीकान्तो
विनायकाः विश्वंभरो विश्वनाथो विश्वसृवि
श्वसूदनः लक्ष्मीवान्जो महात्मा च परमात्मा
परात्परः सर्वपर्वविभवो भवो भवभूतिमयो
भवः विद्याप्रियो विद्यावादी विद्याविशा
रदः पंचस्त्र्याटलयोतिः पीतपर्यरो भगा:
भाग्यवान्भोगी भगीस्त्वंभवविवर्धनः ल
क्ष्मीकालेश्वरो लक्ष्मीग्रहो लक्ष्मीविभावसुः
लक्ष्मीकालेश्वरो लक्ष्मीपर्णो लक्ष्मीविभाकरः
अचिंत्यो नित्यसंयोगी संयमी यमभीतिहृ
त् यामिनीशाधिपकरो रादध्वंसी विभावसुः
धीरो वरमहो भीमो भीमाक्षो भीमवल्लभः
हारी कंकणभूषाढ्यो मालिमान्नूपराचितः

लक्ष्मीकुचेमद्दा
लक्ष्मीधारापर
समच्युतिः विश्व
नो विकलोव्या
ग्रो विलासीगी
नवल्लभः

किंकिणीभिनवसत्तुष्टोवशीवादनतत्परः
स्थानन्तूपपक्षगालिङ्गातरुवक्षोजशीभयी ल
क्ष्मीविनयवांल्लक्ष्मीजयिवांल्लालितारतिः
लक्ष्मीनेत्रवशीलक्ष्मीहास्यवशपोविनर्तकः
नासाग्रियोनदैनन्दीसर्वभ्यसर्वसाम्यदत्
र्वसवोगोप्यमार्गैदैवैसवाचारतत्परः स्वा
त्मापरात्मात्वानात्मालोकदत्तःस्वेश्वरः स
त्वःस्तुत्यःस्तुविनिर्माणनिर्माणात्मानिर्मदर्शनः
पंचनादमयोनान्तःपंचमाचारवल्लभः ल
~~लक्ष्मीविनात्वानात्मालोकदत्तोयवेयवः~~ पं
चमस्वरसंगीतःकीर्तिदोमोदनाशनः ल
क्ष्मीपराक्रमोलक्ष्मीशक्तिभृद्रतिकोविदः
लक्ष्मीयोगीश्वरीलक्ष्मीयोगविद्योगिनायकः

लक्ष्मीलोकेश्वरोलक्ष्मीवल्लुलक्ष्मीमनोह
रः श्रुविंम्बमदिमाविंम्बगारिमाबोरतिस्तु
नः ह्लवीह्लवश्वेदादिव्यरूपोदेवेश्वरेश्वरः
कामदेवोवैद्यवैद्योवेदविद्वेदनायकः स्र
ग्रूपः सामगीतज्ञोयज्ञुर्वेत्ताग्नोपतिः या
ज्ञिकोयामिनोयामात्रिलोकजनकोश्वरः
कामस्थदःकामिवरःकामनीयाकृतिःऊ
हः लक्ष्मीस्पृश्रवक्षीनोलक्ष्मीश्रीरःश्रि
यःपतिः लक्ष्मीकामोलक्ष्मणोयोलक्ष्मी
यामेतिहंदरः श्रुतिर्वेतीयानिसंयोतिर्भ
योनिस्पद्दवः नियमासोनिराधारोनिर्ले
पोनिरहंकृतिः निराश्रयोनिर्ग्रताद्यप्रला
नीनागलोश्वरः ब्रह्मरूपोब्रह्मतेजोहर

लोब्रह्मवर्धनः महाकल्पयंतवत्सर्वेशादय
त्तनाथकः महाकल्पोमहादेवोसाधको
मधुसूदनः लक्ष्मीनिरंजनोलक्ष्मीसिद्धिदः
सिद्धिवर्धनः लक्ष्मीश्रीवत्सवक्षाश्चलक्ष्मी।
कौस्तुभभूषितः सर्वलोकप्रबोदान्नोदेतिद
न्तायुगोदमी अप्रमेयगतिःशांतः श्यामीका
मीह्लातागमः महाकर्मामहावीनोमकार
शिवहृजितः मांसाहारीनित्यसंगीमीना
मवरसाकुलः शुद्धाप्रियोरतानन्दवतोरति
पतिप्रियः अघोरदेवोदैत्यारिर्जितदेवादि
वाकरः निशानाथोमत्तमयोनवग्रहसा
मर्चितः मत्स्यरूपोविरूपात्तोविभाकरप्र
तप्रभः नियहीविग्रहीवासोवरानिधिनि।

वाममार्गरसो
द्रिक्तः सर्वामा
रैकमध्यगः

वामकः पीनबाहुः स्थूलपादो दीर्घवत्सर
लंभुजः पादाम्भस्तकमालीनः सत्यसंधास
नातनः लक्ष्मीसनातनो लक्ष्मीधर्माध्यक्षो
धनेश्वरः लक्ष्मीधनप्रदो लक्ष्मीधर्मभावीव
धर्मवान् वीरहा कुंडरीकान्तः पद्मनाभोज
गत्प्रभुः पद्मामनोज्ञलमयो विस्मयी विम
नस्मयः समानः समदृष्टिश्च विषमोऽविबा
मलक्षणः चात्रमूर्तिर्निखमूर्तिश्च विनितः विंदि
श्रीपतिः सहस्रबाहुस्तेजेयो ब्रलणावणि
जोपतिः सर्वव्यापी सर्वेश्वरः सर्वमध्यात्र
तः सखा चक्रविनोनक्रपतिर्वरुणाधाक्ष
सोदरः दर्पहा सर्पशायनः सर्पाशानवरा
प्रदः अमानी मानदो मान्यो मानवीन्द्रो म

ल:ना·
प
११

29

त्तमः मन्तुवेषोमराध्यक्षोलक्ष्मीलोकैक
वत्सलः शोकहृद्दुर्गमार्गोमोबलिहाकालि
नाशनः शुभांगोमदिरालीवशुभद्रोलोभः
वाकृतिः शृतिस्थितिस्थितनाथश्चानन्तश्चपविवे
षामः वव्रभीगः चतुष्शोभोविश्ववाविलयः
दः प्रलयांतः कपः पाशोजननीजनकप्रियः
यशस्वीश्रीधरः शांतः शांकाप्रातविनाशकः
प्रकृतिवरदः कृतः कीर्त्तिर्वोगनैनायकः स्तव
र्गांसुजरोमारोमारमन्मीतिभूत्तः मोचि
कामंजलोमंत्रीमाद्विकेश्ववरप्रदः लक्ष्मीवि
नवकोवालक्ष्मीनिर्दोवेपुरोमयः अजितःस
रविलस्तानक्ष्मीनीयः कांतवीर्यकः लक्ष्मीप
मपरोलक्ष्मीचंद्रहासोविकातनः लक्ष्मीगो

वर्धनोधरो लक्ष्मीकण्ठधरो विराट् स्कंधा
श्रयो विष्णुधर्मी देवसेनादिनायकः श्रेष्ठ
कुलोत्तुङ्गो लक्ष्मसाक्षमानसोमसुंदरः ना
मसः सात्विकः सत्यः सोमराजमरीचिमान्
सर्विंस्मात्विकलः अल्पाकल्पः संजनहूक
विराजैवामनोवेणुर्वीनरोवारिवाहनः वा
ल्मीकिवरदो वेदीवल्यो बभ्रूकसन्निभः व
र्णश्रीवर्णमालीवर्णमाल्यतिसुंदरः भ
र्गोसहस्रभोक्ताकर्ताहर्ताघातकान्तः अ
कल्पः कोमलः कोपी रमणो मणिकुंडलः
लक्ष्मीकौस्तुभवांल्लक्ष्मीमणिदामविराजितः
लक्ष्मीनूपुरवांल्लक्ष्मीमणिमालाविभूषितः
लक्ष्मीरौप्यांगुलित्राणो लक्ष्मीसौवर्णकंकणः।

ल॰ना॰
प॰
३॰

30

णः लक्ष्मीविराजितो लक्ष्मीविद्याभरणो
ज्ज्वलः ककारादिलकारान्तविद्याभूषणभू
षितः श्रकारान्तरभीतोत्थनिःशेषब्रह्मसं
डितः वर्णमामयो महाविद्यामातृकान्तरत
त्ववान् लक्ष्मीकामेश्वरो लक्ष्मीकामकोटि
नेश्वरः कालावान्कीर्तिमान्कान्तः क्रोंकारा
प्राणहारकः केशान्तकः कालसूत्रकार
कः कष्टहारथीः क्रीनाक्रञ्जः क्रमपथकाल
कुंडकलालुकः कलाध्यक्षः कलाचारीकला
लाकलपदार्चितः कंजकः कर्त्तरीधाः कत
कः कर्त्तरीकरः कलेवराहितः कोकः कोक
शोकनिवर्द्दनः कपिलः कलशीकोलः का
लिकाकलमानसः लक्ष्मीकलाकललक्ष्मी

ङ्गलग्नः कर्मवर्धनः लक्ष्मीकामीश्वरो लक्ष्मी
नवनाथ्यधिनायकः लक्ष्मीकान्तिशोनिधि
ष्ठेलक्ष्मीयोगीन्द्रयोगदः खपुरः खेचरः खे
टः खगगामीकलांतकः खरूपः खगास्य
स्थखनेत्रः खेटनायकः खमाश्रयः खंडधारी
खंजनीतलाभंजनः खध्वंसी खरागावीख
वेगकारभीषणः घंखलीलाखगामतिखे
चरीश्वरसेवितः खेचरीगणसेव्यश्च खड्ग
मुद्रानियोजितः खड्गहस्तः खड्गपालः खेटः
खवर्णभूषणः लक्ष्मीखेगः खेकरूपाल।
क्ष्मीभास्वरभूतिमान् लक्ष्मीखड्गांगमंडला।
क्ष्मीज्योतिष्मानलसंचितः लक्ष्मीगीतः स्वरा
लापीगोपतिगौङ्गलेश्वरः गंगाधरप्रियोगो

ष्ठीगोपालोगन्धवर्धनः गंधवाहप्रियोगी
तोगीतस्तोगीतलालपः गुंजाहारप्रियोगं
डीगुरुर्गोवाहनोगवः गंभीर्योवान्जकृत
गीत्रसवाह्याविवर्धनः गुरुभक्तिप्रियोगो
लीगंडशैलनिवासकः गर्जनादोगोचयपति
गीलमार्गप्रियोगवान् निंगोगजवक्त्रोगो
गणनायकनायकः गंधर्वनाथवरदोगो
गोनेचरस्तुजितः गर्भहीनोगर्भवासीगुरो
योगुणसागरः गुणातीतवर्गोत्तपोगुरा
मार्गप्रवर्तकः गुरुमंत्रप्रियोगोप्योगुरो
गुरुयकवल्लभः गोपितोगोगिरिनाथस्वागोगिरि
धारीजगन्निधिः लक्ष्मीप्रियःप्रियःश्रीतोल
स्मीगजंडवाहनः लक्ष्मीकपोलतिलकोला

क्ष्मीकल्पद्रुमोरविः लक्ष्मीसल्लापकः सारोल
क्ष्मीसावेललतापतिः लक्ष्मीगात्र्याः लक्ष्मावल
क्ष्मीसागरनन्दनः ह्रुणीह्रुणिमयोह्रुणोजुस
णाकर्षईश्वरः ह्रुणामयो चन्दनीचह्रुणिनाथ
चवर्णाभाक् लक्ष्मीचिन्तामणिसाध्यलक्ष्मीवी
रोचवीरनमः लक्ष्मीचक्रवर्तीजोलिक्ष्मीविश्वना॥
थोविनायकः ॐवर्णोॐकालरूपश्चॐनयी॥
ॐनरूपवान् ॐवर्णरूपोविश्वेशोॐकारः॥
तारमंडलः लक्ष्मीसेव्योमिगुणात्मालक्ष्मी
शानःशिवार्चितः चारुरूपश्चारुगातिश्चारुस्मृ
तिश्चमत्कृतिः चारुनेत्रश्चारुभ्रूलश्चारुबाहु
श्चतुर्भुजः चारुहल्लर्षकनालश्चारुकेयाश्चा
रुपतिः चिन्तावासीचरचोलचीनाम्बरयरो॥

ल॰ना॰
पं
३२

32

ष्टुतः चारुहासश्चारुदन्ताश्चुवनः सुंदराशि
नः चन्द्रश्चन्द्रकलानाथश्चारुपादश्चलद्गतिः
चलद्दास्याचलद्ग्रीवाचलद्भ्रूर्मिपयोधरः चलद्
सस्त्रद्वगायनः चलत्सागरलोचनः चलद्भ्रुतिश्च
द्गुवाष्याचलद्वीरवरोवरः चलद्वेदमयोवे॰
यश्चार्वंगश्चारुभूषितः चलद्वक्रांश्चलद्वक्रप
जितः परमेश्वरः चलच्चन्द्रकशोभाढ्यश्चल
न्नूपुरभूजितः चलदंभोदसद्दृशश्चलदंभो
जलोचनः चलदंभोदवदनश्चलदंभोद॰
शोभितः चलत्कनककेयूरः चलत्कांचनकुं
डलः चलत्कनकसूंगाभश्चलत्कनकशोख
रः चकारुरूपश्चारेयाः चकाराद्ताविभूषितः
लक्ष्मीयांतोमहादेवोलक्ष्मीपीतांबरःपविः

क्षीरोक्षत्रपरःक्षमःक्षितमस्ताशियःपिता।
क्षत्रक्षेदीक्षितक्षुरवःक्षकारान्तरभूषवान्
लक्ष्मीकांतःकांतिरूपोलक्ष्मीसाधकईश्वरः।
जगन्नाथोजगद्धर्ताजगत्कर्ताजगत्स्थितिः ज
गत्त्रयकर्ताजगतांपतिरुत्तमः जगत्स्वा
मीजगद्धाताजगत्संहारकारकः जीवात्मा
परमात्माचजगद्भूतिप्रदोभवः जगद्गुणी।
जगत्स्तुत्योजगदानंददायकः जगत्सन्तोष।
भूतात्माजगद्दयान्वितः जगद्दीप्तिकरो
वेदोपासितोजगदीश्वरः जगद्वीजयान्वितोजग
रोजगदैश्वर्यप्रदः जगत्सेव्योजगत्साक्षीतोजगदि
ष्टोजगन्मयः जरम्भणोजगटिलोजीवोजंभगा।
तिवरप्रदः जगमानाजलुपैताचजठास्त्रजद।

ल॰ना॰
पं
३२

33

मंडितः जितारिर्जयदो जेयो जयस्कन्दी विमाध
वः लक्ष्मीकुचतटासीनो लक्ष्मीनयनगोच
रः यातुबीजोन्तकृतो फेंऊी फेंऊी बीजं ठब्रतापनः
फोंकारी फंकृतिफिल्लीरवो फोंकारविग्रहः
लक्ष्मीवरो महालक्ष्मीसवितो देववन्दितः
वंकारो वर्णरवो वेद्यो नवभ्राम्यत्त रूपवान्
लक्ष्मीस्वभूः स्वर्गपतिर्लक्ष्मीवंशो विशुंभदः
टंकारो टंकदल्ताक्षटालोटीत्कारवृन्दजितः
लक्ष्मीदेवो देवदेवो लक्ष्मीदानः कृपानिधिः
ठंकारो ठालकोठाम्पो ठवर्णस्तुभ्रमानिधिः
लक्ष्मीविद्युद्विलक्रीडो वैनतेयध्वजोध्वजः उम
तुडामरेशानो डकाराक्षरसंस्तुतः लक्ष्मीपतिः
पीवरांगो लक्ष्मीनायकनायकः ढकारवा

गरुडकेभेयोद्धका [illegible] मधुनिसूदनः लक्ष्मीजे
ताजयकरो लक्ष्मीशो लक्ष्मीपूर्वजः लक्ष्मी॰
जगन्नियति [illegible] लक्ष्मीशौरि लक्ष्मीगदाधरः
लोलोलालावलीलोलोलोलालावलीस्तनसाथि
नः लक्ष्मीदामोदरो लक्ष्मीप्राणो लक्ष्मीरथांग
भृत् लक्ष्मीवल्लभो महानन्तो विभुल्लालालीभे
डितः लोलल्लक्ष्मीनाथस्तंयत्नोमंचना
यकः नयः फलप्रदस्तानस्तूपोलल्लपरात्क्रम
हाटकूपस्तदिगतितपत्नीनापसप्रियः ल
हितांसुत्वदितजस्तपारकरपोमितः लक्ष्मी
सेव्यस्तलाभस्वनकारालरमणः लक्ष्मी
शांर्ङ्गधरो लक्ष्मीनन्दकीरातिवर्णीभृत् स्य
विः स्थलगात्रमस्यालसेव्योपघाहकृत

ल॰ना॰
पं
३४

34

स्त्रीलीरसप्रियो स्थूलः स्थकारेश्वरेश्वरः
लक्ष्मीजीवेश्वरो लक्ष्मीधरो लक्ष्मीनृसिंहकः
दयावान्भूपतिर्दक्षो गुप्तोदंभविवर्जितः
दारिद्र्यहा दुःखहर्ता दौर्भाग्यदलघातकृद्दयी दी
नोदीनोप्रभुर्दंभीदयतोदयवाञ्छकः दान
कृद्दानफलदो दत्तज्ञेन्द्रलयंकरः दारप्रियो
दीर्घनाथो ऽक्षासुरनिसूदनः देवदेवो यशो
वंशोदकावाहरमंडितः लक्ष्मीदयाकरो
लक्ष्मीदेवो लक्ष्मीदयानिधिः धनस्तुद्धनकृ
द्धेयो धनदेशो धनप्रदः धृतिवान्धनवा
न्त्रीधर्मकर्मफलप्रदः धर्माध्यक्षो धः
र्मकरो धवलो धीरवान्धनी धीरो धैर्यकरो
धर्मदक्षो धनदत्पूजितः लक्ष्मीपतीमहा

लक्ष्मीपवो लक्ष्मीमनोभवः नवीनो नू
तनो नक्षो नटो नासुतो खिनः नागो ना
गनगश्रेष्ठो नगस्पनामसमेडनः नृसिंहो
नृवरो नेंतो लरनारायणो नवः नागराजो
नागपतिर्नगान्तकध्वजो नलः नागारूढो
निम्रनाभः नंदिसेवो नटेश्वरः नाथनातो
भवंशोपि नायको नागनायकः नर्मदाती
रक्रीडो हृत्कमलिनीपतिलोचनः नारीमो
हपशृञ्खनागघाधीनरोन्नमः नाराय
णो निष्कलंको नवर्णो हृतिरात्मवान् ल
क्ष्मीनागो नगधरो लक्ष्मीघाघोमरूपवा
न् श्रुघ्राभिपः श्रुघ्रघाघ्राघार्यनः श्रुघ्रघो
त्वरः श्रुघ्यघन्वाश्रश्रुम्रष्ठ नामनामावलीजते

ल:ना
पं
३५

35

शुद्धोशुद्धश्चसूजितः सूक्ष्मः पवित्रंपरमेश्वर
मेष्ठीपितामहः परंपदंपरंब्रह्मपरमा
त्मः परात्परः पारावारस्तनामन्तोपरमेश्वाः
परंमहः श्रुतापदःश्रुतपक्षस्सूज्यःश्रुताग्ना
गमस्संनिनः श्रुतार्श्रुक्षयःपीनसीनवत्सा
जितेन्द्रियः पीतवासःपीतमालःपीतवा
णिःपरांकुशः पद्मगोविक्षतःपद्मपाधिकः
पाश्रुतोषदः सूर्वपौरजनैस्तुतःपवर्णोत्तली
मेडनः लक्ष्मीपीतांवरोलक्ष्मीपीनोलक्ष्मी
परःश्रमान् फलंफलिवरःस्फीतःफलकृ
त्फलदाफली फलाशाखाखाखानस्वफा
कारामस्तनमेडनः बालकोबुद्धिमान्वौयोव
नःवर्त्मवरेश्वरः लक्ष्मीवंधुर्महालक्ष्मीवांध

बोलक्षणान्वितः भद्रपदो भास्वंगो भा
स्करो भानुरव्ययः भातिथिर्भगवान्भीतो
भीतिहा भयदायकः लक्ष्मीभयहरो लक्ष्मी
भयदो भयघातनः महेश्वरो महामायो म
हामायो मनोरमः मनोहारी महाशांतो
महातेजा मनोजवः महोन्मादी माधवश्च
मायाचारी मनोर्मनः मानदो मरघाती च
मानवेष्टफलप्रदः मदिरामोदमुदितो।
मारमोहविवर्जितः लक्ष्मीमोहदयो लक्ष्मी
मानो लक्ष्मीमदालसः यशोदानंदनो यांतो
यशस्वी योधसैनिकः यशोधरो यशो यो।
गीयोगिसंयोगदायकः योगेन्द्रो यागसूक्ष्म
स्मयादवो यादवेश्वरः यज्ञप्रीतो यज्ञनिधि।

ल:ना: पं २९

यज्ञकोयाज्ञकप्रियः यज्वायज्वायशोज्ञा।
नोयकारात्तरद्रूपवान् लक्ष्मीयत्तकरोल:
क्ष्मीयाज्ञिकोयज्ञसेवितः राज्ञारमापतिर्देवो
रामोराजारजोरजः राजसेव्यस्त्रिकूटरामोरा:
मानंदप्रदायकः रेवतीरमणोरत्नापतिः
सर्वकलाधरः लक्ष्मीरामोमहालक्ष्मीराज्ञा
लक्ष्मीत्रिविक्रमः लालाकर्णोलीनवराहोल
लज्जिदोललनापतिः लंकेशोलास्यकोलोल
लंबोधरप्रियापरः लक्ष्मीलीलोलिवर्णोयल
कारकारईश्वरः वंतदोवीरसेनानीर्वराहः
विग्रहोविराट् विश्वंभरान्यरानाथोवसुदे
वसुधाधिपः वागीश्वरोवेणुहस्तोवेतालो
विरमेविपत् विद्वान्विशालनयनोविकारो

विज्ञातिःश्रमान् विनेकीविनयीविद्याराज
मात्योविशारदः वाग्मीवाग्नीश्वरमूलस्योवा
चाटोवीरनायकः लक्ष्मीवराहोवीरेशोल
क्ष्मीवीरोवनेचरः शंकरःश्रीधरःश्रीलःश्रु
धीधीमान्स्मृ(श्री)तिलः धाधामौलिधारोन्नागः
शंभुशंखरतिस्मृदनः शाकःशाङ्गलशकरःशा
ङ्गकालकरःशिवः लक्ष्मीशिवःश्रीपतिश्री
वरोलक्ष्मीशिवप्रदः षोडशास्वरूपश्चषोड
शार्णावभूषणः षडंगाविद्यावेत्ताचषकार
स्वरभूषितः लक्ष्मीषडंगधारीचलक्ष्मीषो
डशार्णिधर्मत्न् संदरःसर्गविस्मृतिःसर्वैशःस
र्वेनीशुरुः समन्ताक्षिसदाचारःसाधुसाधु
जनप्रियः सवलःसरलःसारःस्वर्तीस्तत्वदि

र्वतः सप्तद्वीपवतीनाथः सप्तसागरनाय
कः सप्तस्वरमयस्सप्तपातालतलवासकः
सात्विकः सत्वसंपन्नः सप्तत्तुदितापहः स
प्तत्तरिपुविध्वंसी सप्तस्तास्वरच्यानवः सप्ता
स्तपातकध्वंसी सप्तसप्तस्वरवादितः लक्ष्मीस
नातनो लक्ष्मीसनकः साधुपूजितः हरिर्देवो
हरिहरो हारकेयोरहारापहः हरिद्वर्णो ह
रितोदरो हरितलोचनः लक्ष्मीहरिप्रियो
केशो लक्ष्मीहारधरीनद्धः लक्ष्मीक्ष्मापति
तं नाक्ष्मेयः लक्ष्मवर्णभाक् द्युतक्षत्वा
दानाथः क्षमावाक्षभितामृतः लक्ष्मीक्षमाउ
तो लक्ष्मीलक्ष्मा लक्ष्मीलक्षवर्णाम्बरः ध्रुवेनोने
दिहृत्पद्मापाद्यादिताद्यिक्षतनिभः इन्द्रिवा

क्ष्मीदेवईश्वरब्रह्मरूपवान् ऊक्षोज्जलोपि
ह्सराह्राक्षकारोज्वलमातृकः लुवर्णवर्णे
लुकारेणनवर्णसमन्वितः ऐश्वर्यसहितस्से
व्योमर्षेणमंत्रस्वरार्चितः ॐह्रींश्लौः ह्रींश्रींदेवा
लक्ष्मीनारायणाःशिवः १०० इतिमंत्रमयंना
म्नांसहस्रंतवसुव्रते अकारादिक्षकारान्ता
विद्यानिर्णयमीश्वरि सर्वतीर्थमयंसर्वदेव
दानवपूजितं अश्वमेधसहस्राणिवाजपेय
स्यकोटयः चान्द्रायणानिसुतेदेवि महादाना
न्यनेकशः मंत्रनामसहस्रस्यकलांनार्हन्ति
षोडशीम् अर्धरात्रेपठेद्धीरः शान्तिवह्निःस्थि
तः शुचिः स्वप्नेलक्ष्मीप्रियंदेवंवरदंसोपिपश्य
ति महादीनार्चनेभ्यत्वापठेद्दीपार्चनेसमृत

यात्तवर्षसहस्राणि पूजया फलमाप्नुयात्
एकवारं पठेद्यस्तु स पूज्यस्सर्वसन्निधौ सभा
वत्साधकः श्रीमान् सूर्यं तत्त्वविद्दिवं व्रजेत् पु
ण्यदं वरदं नित्यं तीर्थसाधनमुत्तमम् योगि
नां योगिदं पुण्यं भोगिनां भोगवर्धनम् रोगिणां
रोगनाशनं सर्वदुष्कृतिनाशनं वैष्णवानां प्रि
यतरं मुमुक्षूणां परमार्थदं अदातव्यमश्रोतव्य
मन्यशिष्याय पार्वति विना दानेन न दद्या
यान्न दद्याद्दक्षिणां विना दत्वा गुरुर्दीक्षा गुरु
रोः सिद्धिहानिं भवेद्ध्रुवं इदं नामसहस्रं तु ल
क्ष्मीनारायणात्मकं तव भक्त्या मयाख्यातं गो
पनीयं स्वयोनिवत् इति श्रीरुद्रयामले तंत्रे दे
वीरहस्ये लक्ष्मीनारायणनामकाख्यानेना

96

मैकोनचत्वारिंशः पटलः ॥ श्रीभैरवः

[illegible] ॐ अथ वक्ष्ये तत्त्व सर्वस्वं रहस्यं परमाद्भु

तम् मंत्रस्तोत्रं प्रवक्ष्यामि लक्ष्मीनारायणात्म

के पंचमार्गं महादेवि परमार्थप्रकाशकम्

चतुर्वर्गागमसत्त्वं भोगमोक्षैककारकं ऽ

र्थेऽश्वमेधादिकं मंत्रराजस्य पार्वति कैवल्यका

नामसंदोहं चिदानंदरसकारणं अस्य श्रील ।

क्ष्मीनारायणस्तोत्रराजस्य शिवऋषिः त्रिष्टु

प्छंदः श्रीलक्ष्मीनारायणोदेवता श्रींबीजं ।

ह्रींशक्तिः ॐ कीलकं भोगापवर्गसिद्ध्यर्थे पा

ठेविनियोगः अथध्यानम् पूर्णेन्दुवदनंपी

तवाससंकमलासनं लक्ष्म्याश्रितंचतुर्बाहुं

लक्ष्मीनारायणंभजे किरीटिनंकुंडलहारा ।

ल॰ना॰
पं
३९

39

मरिरीतं पद्मासनं श्यामसुंदरं चतुर्भुजं पी

तांबरं शंखगदाब्जपाणिं श्रीलालसीधृतस॰

घंभजेविभुम् ॐश्रणावे यदिमानवोजनो

हरिपादाम्बुजसेवनाज्झलः दनज्ञानात्क

पामयातिनूनंपरमानंदमयोगतस्मयः १

परावीजंनंदंयदिजपतिजनलज्जंपश्रविस्म॰

राक्रांतःस्वर्गामजटिलमामौक्तिनभयः

भवेत्कीलेश्यानःसकलरिपुदावाग्निजला

दः स्वरस्त्रीभिःसार्धंपुरविटपिवाटेष्वरमा॰

ते २ विवीजंयोमहामंत्रंजपेदानंदनिर्भरः

आनंदरूपीभवितालक्ष्मीनारायणप्रियः २

विभूतिवीजंमंत्रराजतत्त्वंजपेन्द्रनांतेयदि

कौलकेन्द्रः सयातिदेवासुरज्यतांत्रिःपरं

पदं सर्वमहैश्वर्यलभ्यम् ४ मयाबीजमन्त्रः

परमार्थेनत्वं सत्त्वैकरूपं मनसाजपेद्यः

सकामिनीकामशरणप्रवीणो भवेद्दी

णाश्रुदर्पहारी ५ रमाबीजनामाक्षर

पदमर्थमेवश्रुकूटं जपेद्योयेन्द्रायेदरिद्र

रत्नायपार्पितमनः भवेद्भूभृन्मौलिस्फु

रितमणिमालानिबद्धते प्रभाभास्वत्पा

दस्सदपरिणियरेन्द्रो विजयति ६ नारायणा

येतिजपेन्मन्त्रंयोरागोप्रभातेपरमार्थेऽभ

बीजं सर्वैरिद्रावानलवारिवाहोभवेत्स

मीभिर्ग्रैस्सदर्पहारी ७ विश्वंजपेद्योहृदि

विश्वसारंविश्वंभरात्मानपरःप्रभाते सा

म्राज्यलक्ष्मीसरिहात्विजिमलभेद्रुविश

ल॰ना॰
पं॰
५॰

५०

र्गमता परास्तु: ८ चक्रग्रास्वहृन्तशोड
शारवसुपञ्चांचितकाख्यविन्दो कमला
श्रितमीशं निविष्टपरमानंदमयं भक्ता
मंत्तम् ९ इतिमंत्रमयंपठेत्स्तवंयोस्य
दिनारायणवल्लभंप्रभाते कमलावि
मलाशयस्तस्यकृतिशीलस्यवशी
भविष्यति इतीदंस्तोत्रमीशानिमल्लमं
त्रमयंपरम् नवभक्त्यामयाख्यातंनचा
ख्येयंममस्तुभिः पंचांगमिदमाख्यातंल
क्ष्मीनारायणस्यते वर्णितंगोप्यमत्यो
द्धंगोपनीयंप्रयत्नतः देव्युवाच + ल
क्ष्मीनारायणस्यास्यकृत्वापंचांगमुत्तमं
मयामास्परमानंदोदास्यहितंवदामिकि

भगवन्सर्वतत्वज्ञसर्वलोकहितेरतः
कीनास्मिभव भावेन कथनेनास्य
पंकर +

म श्रीभैरव्या यन्मदं रहस्यमखिलं सर्वतंत्रे

सु गोपितम् वेदनालोऽप्यतंत्राष्टदेवि तत्क

थितं मया देवानां दुर्लभं तत्त्वं पंचाङ्गं वैल

वार्चिते रहस्यं सर्वलोकानां सर्वस्वं मम

पार्वति अप्रकाश्यमवक्तव्यमदातव्यं

दुरात्मने देयं शिष्याय शान्ताय गुरुभ

क्तिरताय च दानशीलाय भक्ताय कौला

मार्गरताय च महाचीनपदस्थाय वैष्णवा

य महात्मने दत्त्वा स्वाभ्रं किल भेद्रे विभक्ता

नां सिद्धिदायिनी इतीदं परमं तत्त्वं तत्त्वा

तत्त्वं परात्परम् गुह्यं गोप्यं गोपनीयं देवा

त्याज्ञा परमेश्वरी ॥ इति श्रीदेवीरहस्ये

तंत्रे लक्ष्मीनारायणस्तवव्याख्याने नाम चा

ल.ता
पं.
५१

त्वारिंशः पटलः ॥ शुभमस्तु सर्वजगताम् ॥ ॐ राम ॐ राम ॥

